# N-211512–B

## विषय : संस्कृतम् ( सामान्यम् )

समय : 3 घण्टे ] [ पूर्णांक : 75

*निर्देश* : (*i*) सर्वे प्रश्नाः समाधेयाः।

(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न–1** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

अन्येद्युः तौ न्यायालये स्वं स्वं पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

**प्रश्न–2** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

पितः नगरे सर्वत्र दीपमालिकापर्वणः शुभागमने अग्निक्रीडनकानां पटापटशब्दः श्रूयते। अस्माकं गृहं न शोधितं न धवलीकृतम्। मम सखीभिः तु प्रभूतेन धनव्ययेन क्रीतानि अग्निक्रीडनकानि। इदानीं तु अहमपि पञ्चशतरुप्यकाणाम् अग्निक्रीडनकानि क्रेतुम् इच्छामि।

**प्रश्न-3** अधोलिखितस्य श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

केषाञ्चिदपि वस्तूनां गम्यते सङ्गिना गुणः।
वैद्यनापितहन्तॄणां हस्तेषु क्षुरिका यथा॥

**प्रश्न-4** अधोलिखितस्य श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

तपः स्वधर्मवर्तित्वं मनसो दमनं दमः।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्तनम्॥

**प्रश्न-5** वाच्यमनुसृत्य नाम लिखत— [1×3=3]

(क) शिशुना सुप्यते।

(ख) रमया भोजनं पच्यते।

(ग) अहं पत्रं लिखामि।

**प्रश्न-6** समासविग्रहं कृत्वा नामानि लिखत— [1×3=3]

(क) पीताम्बरः

(ख) चतुर्युगम्

(ग) पित्रापुत्रौ

**प्रश्न-7** कोष्ठकाद् उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत— [1×3=3]

(क) —— सः पिपासया व्याकुलः अभवत्। (एकदा / कदा)

(ख) परिवारः —— मम दुःखस्य कारणम्। (एव / इव)

(ग) —— सोमवासरः भविष्यति। (श्वः / ह्यः)

**प्रश्न-8** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(i) भरताय किं रोचते ?

(ii) के रोगाणाम् अपहारकाः ?

(iii) लाभानामुत्तमं किम् अस्ति ?

(iv) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते ?

(v) आत्मानन्देन लिखितग्रन्थस्य नाम किम् ?

(vi) मङ्गलयानं कुतः विमुक्तम् ?

प्रश्न-9 अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(i) लोकः केन न प्रकाशते ?

(ii) आत्मानन्दस्य जन्म कदा अभवत् ?

(iii) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति ?

(iv) राजा बिलासां कस्मिन् पदे न्ययोजयत् ?

(v) कः देशः स्वकीये प्रथमप्रयासे मङ्गलग्रहकक्षम् अलभत ?

(vi) संसारे कानि-कानि चक्रवत् परिवर्तन्ते ?

प्रश्न-10 स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1×4=4]

*अथवा*

अत्र अधः सूक्तिवाक्यद्वयं प्रदीयते। सूक्तिवाक्ये पठित्वा अवबुध्य च तयोः भावार्थं हिन्दीभाषायां स्पष्टीकृत्य लिखत—

(i) यत्र जीवः, तत्र शिवः।

(ii) तपसा विन्दते महत्।

प्रश्न-11 (अ) भवतः नाम सुरेशः। भवान् शा. उच्च. माध्य. विद्यालय राजपुरे दशम्याः कक्षायाः छात्रः। कतिपयेभ्यः दिनेभ्यः भवान् अस्वस्थताम् अनुभवन् अस्ति, विद्यालयं च गन्तुम् असमर्थोऽस्ति। अतः अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

**अथवा**

अध्ययनशुल्कमुक्तये प्राचार्यं प्रति प्रार्थनापत्रम् अध: प्रदत्तम् अस्ति। लिखितेऽस्मिन् पत्रे रिक्तस्थानानि सन्ति। तानि कोष्ठकप्रदत्तपदानां सहयोगेन पूरयत। [½×8=4]

(अध्ययनशुल्कं, न्यून:, मम, एका, निवेदयामि, सदस्या:, निर्वाह:, महोदय:)

सेवायाम्

प्राचार्य: ---(i)---

शास. उच्च. मा. विद्यालय:

राजपुरम् छत्तीसगढ़म्

विषय: अध्ययनशुल्कमुक्त्यर्थं प्रार्थनापत्रम्।

महोदय,

सविनयं निवेदनम् अस्ति यत् ---(ii)--- पिता एक: चतुर्थश्रेणी कर्मचारी अस्ति। तस्य मासिक: आय: अतीव: ---(iii)--- अस्ति। येन परिवारस्य ---(iv)--- काठिन्येन भवति। मम परिवारे मातापितरौ, द्वौ भ्रातरौ ---(v)--- भगिनी च, इति पञ्च ---(vi)--- सन्ति। अत: अहं भवन्तं ---(vii)--- यत् मम ---(viii)--- क्षम्यताम् कृपया।

दिनाङ्क : 20-03-2021

भवदीय: शिष्य:
सुरेश कुमार:

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत :

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति। व्यवहारे केचन् दोषा: अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्य: शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

प्रश्ना:

[2×2=4]

(i) संस्कृतभाषया सारांशं लिखत।

(ii) उचितं शीर्षकं लिखत।

*अथवा*

निर्देशानुसारम् उत्तरत—

[1×4=4]

(i) जनानां शासनं किं कथ्यते ?

(ii) 'गुणानाम्' इति पदस्य किं विलोमपदम् अस्मिन् गद्यांशे प्रयुक्तम् ?

(iii) 'जनतन्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(iv) कां विना लोकतन्त्रं सुरक्षितं न भवति ?

प्रश्न-12 स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत, यौ प्रश्नपत्रेऽस्मिन् नागतौ स्याताम्। [2½×2=5]

*अथवा*

स्वपाठ्यपुस्तकात् 'वृक्षस्य महत्त्वम्' इति विषये एकं सुभाषित श्लोकं लिखत।

प्रश्न-13 द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि एक:)— [½×12=6]

(i) ग्राम्यजीवनम्

(ii) मम प्रदेश:

(iii) सदाचार:

(iv) महाकवि: कालिदास:

प्रश्न-14 अध: प्रदत्ते संख्ये संस्कृतभाषया लिखत— [1×2=2]

(क) 146

(ख) 119

प्रश्न-15 अधोलिखितपदयो: सन्धिविच्छेदं कृत्वा तयो: नाम्नी लिखत— [½×4=2]

(क) पुष्पाणां विकास:

(ख) जगदीश:

प्रश्न-16 निम्नरेखाङ्कितशब्दयोः प्रकृतिं प्रत्ययं च पृथक् कुरुत— [1×2=2]

(क) निर्धनता दुःखदायिनी भवति।

(ख) अयं काल्पनिकः उपन्यासः केन लिखितः।

प्रश्न-17 अधोलिखितवाक्ययोः रेखांकितपदाभ्याम् उपसर्गं पृथक् कुरुत— [1×2=2]

(क) शिक्षिका इतानीं कक्षां प्रविशति।

(ख) सन्तः अपमानस्य दुःखं न अनुभवति।

प्रश्न-18 (अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) स्वामि आत्मानन्दस्य पिता आसीत्—

(क) कृपारामः

(ख) मणिरामः

(ग) धनीरामः

(घ) रतिरामः

(ii) एषु शब्देषु भिन्नः—

(क) भवन्ति

(ख) पठन्ति

(ग) सन्ति

(घ) हन्ति

(iii) 'भवताम्' शब्दे विभक्तिः अस्ति—

(क) चतुर्थी

(ख) पंचमी

(ग) षष्ठी

(घ) तृतीया

(*iv*) 'वागीशः' इति शब्दस्य सन्धिविच्छेदः अस्ति—

(क) वा + गीशः

(ख) वाक् + ईशः

(ग) वाग् + ईशः

(घ) वागी + ईशः

(*v*) 'उष्णता' इत्यस्मिन् शब्दे प्रत्ययः अस्ति—

(क) क्त

(ख) ङीप

(ग) तल्

(घ) ठक्

(च) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(उपसर्गः, साकं, वेपते, स्वर्गं, वर्तते)

(*i*) सङ्गात् —— न गच्छति।

(*ii*) —— मे शरीरम्।

(*iii*) 'प्रकाशते' इति शब्दे 'प्र' —— अस्ति।

(*iv*) माता पुत्रेण —— आपणं गच्छति।

(*v*) 'वृत्' धातोः लट् लकारस्य रूपं ——।

**( स )** उचितं स्तम्भं सुमेलयत— [1×5=5]

| | ( क ) | | ( ख ) |
|---|---|---|---|
| (*i*) | यक्षयुधिष्ठिरसंवादः | - | सुहताः |
| (*ii*) | प्रज्ञाहता | - | सप्तमी |
| (*iii*) | विदुषि | - | भूतकालः |
| (*iv*) | समयः | - | महाभारते |
| (*v*) | अलिखम् | - | द्वितीया |